# वक्रोक्तिजीवितम्

(प्रश्नोत्तरम्)

लेखकः

डॉ. वसन्तकुमारमुद्रा

सांविदीप्रकाशनम्

४७, महोदधिमार्केट, मोचिसाहि, पुरी-७५२००१

Scanned with CamScanner

प्रस्तुतेऽत्र विषये आचार्येण कुन्तकेन महाकवेः कालिदासस्य खण्डकाव्यस्य मेघदूतस्योत्कृष्टमेकमुदाहरणं व्यावहारिकपक्षोपस्थापनायोपस्थापितम् ।

**५. कुन्तकाभिमतं काव्यप्रयोजनं प्रतिपादयत ।**

**उत्तरम्**— प्रस्तुताः इमे प्रश्नाः श्रीमद्राजनकाचार्यकुन्तकविरचितस्य वक्रोक्तिजीवितस्य प्रथमोन्मेषे प्रवृत्ताः सन्ति । तत्र वृत्तौ लिखितमस्ति यत् 'एवमलङ्कारस्यास्य प्रयोजनमस्तीति स्थापितेऽपि तदलङ्कार्यस्य काव्यस्य प्रयोजनं विना यदपि तदपार्थक्यमित्याह–

धर्मादिसाधनोपायः सुकुमारक्रमोदितः ।
काव्यबन्धोऽभिजातानां हृदयाह्लादकारकः ।।

सरसं सरलयुक्त्या कथितं महाकाव्यं धर्मार्थकाममोक्षाणां साधनोपायः तथा च सत्कुलोत्पन्नानां राजपुत्राणां हृदयमाह्लादकारकः भवति । नन्वत्र शङ्क्ते यत्– 'तथापि तथाविधपुरुषार्थोपदेशपरैरपि शास्त्रैः किमपराद्धं'मित्यभिधीयते– काव्यबन्धः सुकुमारक्रमेण कथितो भवति । सुकुमारः अर्थात् सुन्दरत्वेन सज्जनानां हृदयमाहर्ता, क्रमपरिपाट्यारचितत्वात् धर्मादीनां साधनं भवति । राजपुत्रेभ्यः मनोरञ्जके सति प्रवर्त्तनेन धर्मादेरुपायो भवति । तदा शास्त्रेषु धर्मादेरुपदेशः काठिन्येन भवति । एवञ्च– मुख्यं पुरुषार्थसिद्धिलक्षणं प्रयोजनमास्तां तावत्, अन्यदपि लोकयात्राप्रवर्तननिमित्तं भृत्यसुहृत्स्वाम्यादिसमावर्जनमनेन विना सम्यक् न सम्भवतीत्याह–

व्यवहारपरिस्पन्दसौन्दर्यं व्यवहारिभिः ।
सत्काव्याधिगमादेव नूतनौचित्यमाप्यते ।।

लोकव्यवहारे प्रवृत्ताः जनाः नूतनौचित्ययुक्तस्य लोकाचारव्यापारस्य सौन्दर्यमुत्तमकाव्यपरिज्ञानेन प्राप्नुवन्ति । अपि चात्र विमर्शयोग्यः, तथा चास्मिन् वृत्तौ यथा– 'योऽसौ चतुर्वर्गलक्षणः पुरुषार्थस्तदुपार्जनविषयव्युत्पत्तिकारणतया काव्यस्य पारम्पर्येण प्रयोजनमित्याम्नातः, सोऽपि समयान्तरभावितया तदुपभोगस्य तत्फलभूताह्लादकारित्वेन तत्कालमेव पर्यवस्यति । अतस्तदतिरिक्तं किमपि सहृदयहृदयस्वादसुभगं रमणीयं प्रयोजनान्तरमभिधातुमाह–

चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम् ।

काव्यामृतरसेनान्तश्चमत्कारो वितन्यते ।।

तदयमभिप्राय:- योऽसौ चतुर्वर्गफलास्वाद: प्रकृष्टपुरुषार्थतया सर्वशास्त्रप्रयोजनत्वेन प्रसिद्ध: सोऽप्यस्य काव्यामृतचर्वणचमत्कारकलामात्रस्य न कामपि साम्यकलनां कर्त्तुमर्हतीति । दु:श्रवदुर्भगदुरधिगमत्वादिदोषदुष्टोऽध्ययनावसर एव दु:सहदु:खदायीशास्त्रसन्दर्भस्तत्कालकल्पितकमनीयचमत्कृते: काव्यस्य न कथञ्चिदपि स्पर्धामधिरोहतीत्येतदप्यर्थतोऽभिहितं भवति । अपि च काव्यप्रयोजनस्य फलश्रुतिर्यथा-

कटुकौषधवच्छास्त्रमविद्याव्याधिनाशनम् ।
आह्लाद्यमृतवत्काव्यमविवेकगदापहम् ।।

अत्रायमभिप्राय:- वेदादिशास्त्रं (सत्काव्यञ्च) तिक्तकटुयुक्तौषधिवत् अविद्यात्मिकाया: व्याधे: नाशयिता भवति । काव्यञ्च परमाह्लादामृतरसस्येवाविवेकरूपिणो रोगस्य विनाशको भवति । अत: काव्यप्रयोजनं सुतरां सिद्धम्।

Scanned with CamScanner

७. कुन्तकाभिमतं काव्यस्वरूपमालोचयत ।

**उत्तरम्**— आलङ्कारिकाचार्यस्य राजानककुन्तकविरचितस्य वक्रोक्ति-जीवितस्य प्राथमोन्मेषे सप्तमाष्टमकारिकयोः काव्यस्य सामान्यविशेषणलक्षणे स्तः । आदौ तद्विवरणं यथापूर्वं तत्रैव वृत्तौ यथा– ''सालङ्कारस्य काव्यतेति सम्मुग्धतया किञ्चित् काव्यस्वरूपमासूत्रितं निपुणं पुनर्न निश्चितम् । किं लक्षणं वस्तुकाव्यव्यपदेशभाग् भवतीत्याह–

शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि ।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि ।।

नन्वत्र शब्दर्थौ काव्यमिति जिज्ञासायां विशिनष्टि वृत्तौ यथा– 'शब्दार्थौ काव्यं वाचको वाच्यश्चेति द्वौ सम्मिलितौ काव्यम् । द्वावेकमिति विचित्रैवोक्तिः । तेन यत्केषाञ्चिन्मतं कविकौशलकल्पितकमनीयतयातिशयः शब्द एव केवलं काव्यमिति केषाञ्चित् वाच्यमेव रचना वैचित्र्यचमत्कारकारि काव्यमिति, पक्षद्वयमपि निरस्तं भवति । तस्माद् द्वयोरपि प्रतितिलमिव तैलं तद्विदाह्लादकारित्वं वर्त्तते'

Scanned with CamScanner

न पुनरेकस्मिन् यथा–

वाचकवाच्यविशेषौ शब्दार्थौ काव्यमित्यत्रोभावित्येव चिन्त्यम् ।

तेन कविप्रतिभाप्रसूतकमनीयशब्द एव केवलं काव्यं भवतीति ।।

एवञ्च केषाञ्चन विदुषां मतमस्ति वाच्यमेव कामप्यलौकिकीं काव्यचमत्कृतिमुत्पादयति– अनेन प्रकारेण मतद्वयं निरस्तम् । अत्रोभयत्र तिले तैलमिव काव्यतत्त्वज्ञान् आह्लादयति । न केवलमेकस्मिन् एव, तदुदाहरणञ्च यथा–

भण तरुणि रमणमन्दिरमानन्दस्यन्दिसुन्दरेन्दुमुखि ।
यदि सल्लीलोल्लापिनि गच्छसि तत्किं त्वदीयं मे ।।
अनुरणन्मणिमेखलमविरतशिञ्जानमञ्जुमञ्जीरम् ।
परिसरणमरुणचरणे रणरणकमकारणं कुरुते ।।

अत्रामाशयः– कश्चिद्रसपेशलो नायकः आनन्दस्यन्दिनीं चन्द्रमुखीं नायिकां प्रत्याह– हे आनन्दवर्षिणि नायिके ! शरदिन्दुमुखि ! स्वोत्तमक्रीडाविलासनिपुणे ! दीर्घस्वराट [illegible]नि ! अरुणाब्जपादयुक्ते ! यौवनशीले तरुणि ! यदा त्वं स्वप्रियतमस्य रमणमन्दिरं यासि, तदा तव झणझणायमान मणिमेखलायुत अनवरतध्वनियुक्ताया अकारणपरिभ्रमणं दुनोति मे चेतः । अत्र किमित्याह ग्रन्थाकारः । तद्यथा– ''प्रतिभादारिद्र्यदैन्याददतिस्वल्पसुभाषितेन कविना वर्णसावर्ण्यरम्यतामात्रमत्रोदितम्, न पुनर्वाच्यवैचित्र्यकणिका काचिदस्तीति ।

अयमत्रभावः– उपर्युक्ते श्लोकद्वये प्रतिभाविहीनेनात्यल्पसुभाषिणा कविना अक्षरसमाम्नाया मात्रायाः रमणीयतायाः केवलं वर्णनं कृतं न चात्रोक्तिवैचित्र्यस्यात्र कथनमिति । तस्मात्तद् व्यर्थमेवेति । अपि चाग्रे उक्तं यत्– 'वस्तुमात्रं च शोभातिशयशून्यं न काव्यव्यपदेशमर्हति' । यथोक्तं तत्र उदाहरणमुखेन–

प्रकाशस्वाभाव्यं विदधति न भावास्तमसि यत्
तथा नैते ते स्युर्यदि किल तथा तत्र न कथम् ।
गुणाध्यासाभासव्यसनदृढदीक्षा गुरुगुणो
रविव्यापारोऽयं किमथ सदृशं तस्य महसः ।।

प्रस्तुतेऽस्मिन् श्लोके– नीरसतर्ककर्कशवाक्यवासनाधिवासितेन कविना स्वप्रतिभया प्रतीतमात्रवस्तुव्यसनमात्रमेव केवलमुपनिबद्धं न चात्र शब्दवक्रतायाः

Scanned with CamScanner

शोभायाः लेशमात्रमपि दिग्दर्शनम्, यतो हि तर्काश्रिता शय्या एवास्य शरीरमपरञ्च तमोऽतिरिक्तपदार्थधर्मिणः प्रकाशप्रकृतिकाः न भवन्ति, अयमत्र साध्यः । तमसि प्रकाशाभावाद्धेतुः, तदा कथमत्र न प्रदर्शितो दृष्टान्तः चेतसि तर्कन्यास-प्रतिष्ठापनात् । तथा चोक्तं विज्ञेन ग्रन्थकर्त्रा–

तद्भावहेतुभावौ हि दृष्टान्ते तदवेदिनः ।
स्थाप्येते विदुषां वाच्यो हेतुरेव हि केवलः ।।

स्पष्टमेतत् समन्वयश्चात्र कुन्तकमतेन विदधतीति = वि–पूर्वो दधातिः करोत्यर्थे वर्तते । स च करोत्यर्थोऽत्र न सुस्पष्टसमन्वयः, प्रकाशस्वाभाव्यं न कुर्वन्तीति । प्रकाशस्वाभाव्यशब्दोऽपि चिन्त्य एव । प्रकाशः स्वभावो यस्यासौ प्रकाशस्वभावः, तस्य भावः भावप्रत्यये विहिते पूर्वपदस्य वृद्धिः प्राप्नोति । अथ स्वभावस्य भावः स्वाभाव्यमित्यत्रापि भावप्रत्ययान्ताद्भावप्रत्ययो न प्रचुर-प्रयोगार्हः । तथा च प्रकाशश्चासौ स्वाभाव्यं चेति विशेषणसमासोऽपि न समीचीनः ।

एवमेवोक्तपद्यस्य तृतीये च पादेऽत्यन्तासमर्पकसमासभूयस्त्ववैशसं न तद्विदाह्लादकारितामावहति । रविव्यापार इति रविशब्दस्य प्राधान्येनाभिमतस्य समासे गुणीभावो न विकल्पितः, पाठान्तरस्य 'रवेः' इति सम्भवात् ।

अत्र प्रसङ्गे शङ्कते यत्– 'ननु वस्तुमात्रस्याप्यलङ्कारशून्यतया कथं तद्विदाह्लादकारित्वमिति चेत्तन्न, यस्मादलङ्कारेणाप्रस्तुतप्रशंसालक्षणेनान्यापदेश-तया स्फुरितमेव कविचेतसि प्रथमं च प्रतिभा– प्रतिभासमानमघटितपाषाण-सकलकल्पमणिप्रख्यमेव वस्तुविदग्धकविविरचित वक्रवाक्योपारूढं शाणोल्लीढ-मणिमनाहरतया तद्विदाह्लादकारिकाव्यत्वमधिरोहति । तथा चैकस्मिन्नेव वस्तुन्य-वहितानवहितकविद्वितयविरचितं वाक्यद्वयमिदं महदन्तरमावेदयति ।'' सम्प्रति रमणीयताविशिष्टे शब्दे एव काव्यत्वं भवति किन्तु तद्विशिष्टे अर्थेऽपि इत्यत्रोदाहरणमुखेन प्रस्तूयते यथा–

मानिनीजनविलोचनपातानुष्णवाष्पकलुषानभिगृह्णन् ।
मन्दमन्दमुदितः प्रययौ खं भीतभीत इव शीतमयूखः ।।

एवमेव– क्रमावेकद्वित्रि प्रगतिपरिपाटीः प्रकटयन्
कलाः स्वैरं स्वैरं नवकमलकन्दाङ्कुररुचः ।

Scanned with CamScanner

पुरन्ध्रीणां प्रेयो विरहदहनोद्दीपितदृशां
कटाक्षेभ्यो विभ्यन्निभृत इव चन्द्रोऽभ्युदयते ।।

उभयत्र चन्द्रोदयस्य स्फीतं वर्णनं विद्यते । कथनस्य प्रकारभेदेऽपि स्वरूपसाम्यं तु विद्यत एव । अतः कविराह– "एतयोरन्तरं सहृदयसंवेद्यमिति तैरेव विचारणीयम् । तस्मात् स्थितिमेतत् न शब्दस्यैव रमणीयताविशिष्टस्य केवलस्य काव्यत्वम्, नाप्यर्थस्येति तदिदमुक्तम् ।

अत्रायं भावः स्फुटीभवति यत्– रमणीयताविशिष्टस्य शब्दस्यैव न केवलं काव्यत्वं न चाप्यर्थस्यैव केवलं, काव्यत्वन्तूभयत्र प्रसरति । अत एवोक्तमस्ति–

रूपकादिरलङ्कारस्तथान्यैर्बहुधोदितः ।
न कान्तमपि निर्भूषं विभाति वनिताऽऽननम् ।।

रूपकाद्यलङ्कारान्यैरलङ्कारिकैरनेकविधैरुक्तः परञ्च रमणीयं सौन्दर्ययुक्तमपि भूषणरहितं वनिताऽऽननं शोभते । तथा चाह–

रूपकादिमलङ्कारं बाह्यमाचक्षते परे ।
सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलंकृतिम् ।।

अत्रायमाशयः– भामहादयः पूर्ववर्तिनः आलङ्कारिकाः विद्वांसः रूपकाद्यलङ्कारं गौणरूपेणामनन्ति, काव्यस्यालङ्कारिता तु सुबन्ते तिङन्ते व्युत्पत्तिं स्वीकुर्वन्ति।

तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी ।
शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः ।।

अत्रायमाशयः यत्– कारणमिदमभिलक्ष्यैव प्रस्तुतं सौशब्द्यं सचमत्कारं शब्दालङ्कारम् आलङ्कारिकाचार्यचरणैः अर्थस्य व्युत्पत्तिरेतादृशी न भवति अतोऽस्मभ्यन्तु शब्दार्थौ द्वावप्यभीष्टाविति । निष्कर्षश्चात्र– 'तेन शब्दार्थौ द्वौ सम्मिलितौ काव्यमिति स्थितम् । एवमवस्थापिते द्वयोः काव्यत्वे काचिदेकस्य मनाङ्मात्रन्यूनतायां सत्यं काव्यव्यवहारः प्रवर्त्ततेत्याह– सहिताविति । सहितौ सहितभावेन साहित्येनावस्थितौ । काव्यस्य सामान्यलक्षणप्रसङ्गे अलमत्र शास्त्रार्थेन । एवं काव्यस्य सामान्यलक्षणे विहिते विशेषलक्षणमुपक्रमते, तत्र शब्दार्थयोः तावत् स्वरूपं निरूपयति–

Scanned with CamScanner

वाच्योऽर्थो वाचकः शब्दः प्रसिद्धमिति यद्यपि ।
तथापि काव्यमार्गेऽस्मिन् परमार्थोऽयमेतयोः ।।

परमार्थस्तु– शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि ।
अर्थः सहृदयाह्लादकारि स्वस्पन्दसुन्दरः ।।

विवक्षितार्थस्य प्रकाशकः शब्द एव काव्ये शब्दः । तदा पुनः 'सामान्यात्मना वक्तुमभिप्रेतो योऽर्थस्तस्य विशेषाभिधायी शब्दः सम्यग् वाचकतां न प्रतिपद्यते। निष्कर्षश्चात्र– एवं 'शब्दार्थयोः प्रसिद्धस्वरूपातिरिक्तमन्यदेव रूपान्तरमभिधाय न तावन्मात्रमेव काव्योपयोगि, किन्तु वैचित्र्यान्तरविशिष्टमित्याह– 'उभावेतावलङ्कार्यौ तयोः पुनरलंकृतिः' । यद्यपि सर्वेषामुदाहरणानामविकलकाव्यलक्षण-परिसमाप्तिः सम्भवति तथापि यत्प्राधान्येनाभिधीयते स एवांशः प्रत्येकमुद्रिक्ततया तेषां परिस्फुरतीति सहृदयैः स्वयमेवोत्प्रेक्षणीयमिति दिक् ।

Scanned with CamScanner

क्रान्तान्तःकरणया वल्लभं प्रति सन्दिश्यते– यदुपस्थितानां सेवासमापन्नां लक्ष्मीमपास्य श्रियं परित्यज्य पूर्वं यस्त्वं मया सार्धं वनं प्रपन्नो विपिनं प्रयातस्तस्य तव स्वप्नेऽप्येतन्न सम्भाव्यते । तया पुनस्तस्मादेव कोपात् स्त्रीस्वभावसमुचित-सपत्नीविद्वेषात्त्वद् गृहे वसन्ती न सोढाऽस्मि । तदिदमुक्तं भवति– यत्तस्मिन् विधुरदशा विसंकुलेऽपि समये तथाविधप्रसादस्तदतामध्यारोप्य यदिदानीं साम्राज्ये निष्कारणपरित्यागतिरस्कारपात्रतां नीतास्मीत्येतदुचितमनुचितं वा विदितव्यवहार-परम्परेण भवता स्वयमेव विचार्यतामिति ।

अत्रायं निर्गलितोऽर्थः– पूर्वं राज्याभिषेकसमये उपस्थितां साम्राज्यलक्ष्मीं परित्यज्य पित्राज्ञापरिपालनदक्षेन भवता मया सार्धं वनगमनमेव निश्चितमधुना भवान् तावमेव राज्यलक्ष्मीं सम्प्राप्य मां विपिने विसर्जयामासेति किं प्रशस्त-कुलोचितमेतत् ? स्वयमेव विचार्यतां नाम । अत्र कीदृशी वक्रता इत्याह वृत्तिमुखेन– स च वक्रभावस्तथाविधो यः सहस्रधा भिद्यते, बहुप्रकारं भेदमासादयति। सहस्रशब्दोऽत्र संख्याभूयस्त्वामात्रवाची, न नियतार्थवृत्तिः, यथा– सहस्रदलमिति । यस्मात् कविप्रतिभानामानन्त्यान्नियतत्वं न सम्भवति । योऽसौ वाक्यस्य वक्रभावो बहुप्रकारः, न जानीमस्तं कीदृशमित्याह– यत्रालङ्कार-वर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति । यत्र यस्मिन् सावलङ्कारवर्गः कविप्रवाहप्रसिद्ध-प्रतिरूपमादिरलङ्करणकलापः सर्वः सकलोऽप्यन्तर्भविष्यति– अन्तर्भावं व्रजिष्यति, पृथक्त्वेन नावस्थाप्यते । तत्प्रकारभेदत्वेनैव व्यपदेशमासादयिष्यतीत्यर्थः । सालङ्कारवर्गः स्वलक्षणावसरे प्रतिपदमुदाहरिष्यते ।

—*—

## लघुप्रश्नोत्तराणि

१ **वक्रोक्तिजीवितं केन विरचितम् ?**

उ– वक्रोक्तिजीवितं श्रीमद्राजानककुन्तकमहाभागेन विरचितमस्ति ।

२. **कुन्तकस्य वक्रोक्तिजीवितं काव्यमलङ्कारगुणध्वनि-सम्प्रदायेषु कस्मिन् सम्प्रदाये समायाति ?**

उ– वक्रोक्तिजीवितं कस्मिन्नपि सम्प्रदायेऽन्तर्भुतो नैव भवति, अपितु वक्रोक्तिसम्प्रदायः स्वतन्त्रः सम्प्रदायः अस्ति ।



३. **कदा समुत्पन्नोऽयं कविराजानको विद्वद्वरेण्यः कुन्तकः ?**

उ– अयं कुन्तकाचार्यवर्यः दशमशतकस्यान्त्यभागे एकादशशतकस्यादिमे भागे प्रादुर्भूत इति समालोचकाः विद्वांसः समुद्दिरन्ति ।

४. **कस्य विदुषः समकालिकोऽयं कविराजानकः कुन्तकः ?**

उ– आचार्याभिनवगुप्तपादमहाभागस्य समकालिकोऽयमिति उभावेवाचार्यौ समसामयिकाविति स्वीकृतम्भवति आचार्यैः ।

५. **आचार्यकुन्तकस्य सिद्धान्तस्य केन खण्डनं कृतम् ?**

उ– आचार्यकुन्तकस्य सिद्धान्तस्य खण्डनम् एकादशशतकस्य अन्तिमे समये समुत्पन्नेन महिमभट्टाचार्यमहाभागेन कृतमस्ति ।

६. **कुन्तकः राजशेखरात्पूर्ववर्ती परवर्ती वेति सप्रमाणं ब्रूत ?**

उ– वक्रोक्तिजीविते आचार्यराजशेखरस्य ग्रन्थानामुद्धरणं वारं वारं सुप्रयुक्तत्वात् सिध्यति यत् अशंसयमेव कुन्तको राजशेखरात्परवर्तीति।

७. **वक्रोक्तिजीवितकारः कुन्तक इत्यत्र किं प्रमाणम् ?**

उ– अलङ्कारशास्त्रस्येतिहासे 'कुन्तकः' 'कुन्तलो' वा वक्रोक्तिजीवित-कार इति संज्ञयैव सुप्रसिद्धतया कुन्तक एव वक्रोक्तिजीवितस्य कर्तेति प्रमाणम् ।

८. **आचार्यकुन्तकस्य वक्रोक्तिजीविते को सिद्धान्तो निर्धारितः ?**

उ– वक्रोक्तिजीविते कुन्तकमहाभागस्य विशिष्टसिद्धान्तोऽयमेवासीत्, यत् वक्रोक्तिरेव काव्यस्य जीवनधायकं तत्त्वमस्ति ।

९. **आचार्यकुन्तकविरचिताः के के ग्रन्थाः ?**

उ– आचार्यकुन्तकस्य एकला रचना वक्रोक्तिजीवितमेवाऽस्ति ।

१०. **आचार्यकुन्तकस्य वक्रोक्तिजीविते कति अध्यायाः भागाः वा सन्ति ?**

उ– वक्राक्तिजीवितन्नामके आचार्यकुन्तकविरचिते ग्रन्थे चत्वारो आध्यायाः उन्मेषाः वा सन्ति, येषु प्राथमिकोन्मेषद्वयं समुपलब्धमस्ति, अपरञ्चान्तिमो-न्मेषद्वयसमूर्णमेव प्राप्तमस्ति ।



Scanned with CamScanner

११. ग्रन्थोऽयं कतिषु भागेषु विभक्तोऽस्ति ?
उ-अयं वक्रोक्तिजीवितन्नामको ग्रन्थ: त्रिषु भागेषु विभक्तो वर्तते ?
१२. ग्रन्थोऽयं त्रिषु भागेषु विभक्तश्चेत् के च ते त्रयो भागा: ?
उ- ग्रन्थेऽस्मिन् कारिकावृत्ति उदाहरणश्चेति त्रयो भागा: सन्ति ?
१३. किमत्र ग्रन्थे त्रयोऽपि भागा: कुन्तकाचार्यविरचिता वा ग्रन्थान्तरेभ्य: गृहीता ?
उत्तरम्- अस्मिन् वक्रोक्तिजीवितग्रन्थे त्रिषु भागेषु कारिकाभागवृत्तिभागश्चेति भागद्वयं कुन्तकाचार्यस्य स्वीया रचना, कुन्तकाचार्यस्य स्वीया रचना, उदाहरणानि तु संस्कृतसाहित्यस्य प्रसिद्धग्रन्थेभ्य: गृहीतानि सन्ति ।
१४. तत्र प्रथमोन्मेषे के के विषया: प्रतिपादिता: सन्ति ?
उ- वक्रोक्तिजीवितस्य प्रथमोन्मेषे तावत् काव्यस्य प्रयोजनम्, साहित्यस्य कल्पना, वक्रोक्ते: लक्षणञ्च चारुतया वर्णितमस्ति ।
१५. अत्र ग्रन्थे आचार्यकुन्तक: वक्रोक्ते: कति भेदान् स्वीकरोति ?
उ- आचार्यकुन्तक: स्वविरचिते वक्रोक्तिजीवितन्नामके ग्रन्थे वक्रोक्ते: षड्भेदान् स्वीकरोति ।
१६. षण्णां वक्रोक्ति: भेदानां निर्देश: कुत्र वर्तते ?
उ- एषां समेषामपि भेदानां निर्देश: तत्र प्रथमोन्मेषे सामान्यतया कृतो वर्तते ।
१७. के च ते वक्रोक्ते: षड्भेदा: ?
उ- वक्रोक्ते: भेदा: यथा- १. वर्णविन्यासवक्रता, २. पदपूर्वार्द्धवक्रता, ३. प्रत्ययाश्रितवक्रता, ४. वाक्यवक्रता, ५. प्रकरणवक्रता, ६. प्रबन्धवक्रता चेति षड्विधा ।
१८. वक्रोक्तिरित्यस्य कोऽर्थ:, यो हि काव्यजीवितमस्ति ?
उ- वैदग्ध्यभङ्गीभणिति अर्थात् सर्वसाधारणै: प्रयुक्तेभ्य: कथनस्य विलक्षणता ।
१९. वक्रोक्ते: मूलभूता कल्पना कस्य ?
उ- वक्रोक्ते: मूलभूता कल्पना आचार्यभामहस्यास्ति ।



२०. वक्रोक्ते: व्यापके साहित्यिके तत्त्वे श्रेय: कं गच्छति ?
उ- वक्रोक्ते: व्यापके साहित्यिके तत्त्वे श्रेय: कुन्तकं प्रतिगच्छति ।
२१. वक्रोक्ते: षण्णां भेदानां सामान्यतया वर्णनं प्रथमोन्मेषे चेत् विस्तृतवर्णनं कुत्र ?
उ- वर्णविन्यासवक्रता-पदपूर्वार्द्धवक्रता-प्रत्ययवक्रतायाश्च वर्णनं विस्तृत-रूपेण द्वितीयोन्मेषे विद्यते, तथा च वाक्यवक्रताया: विस्तृतं वर्णनं तृतीयोन्मेषे विद्यते ।
२२. एवञ्च चतुर्थोन्मेषे विस्तृतं वर्णनं किमस्ति ?
उ- चतुर्थोन्मेषे प्रकरणवक्रताया: प्रबन्धवक्रतायाश्च विशदं वर्णनं विद्यते।
२३. आचार्यकुन्तकस्य प्रसिद्धे: कारणं किम् ?
उ- आचार्यकुन्तकस्य वैशिष्ट्यं वक्रोक्ते: सुचिन्तिताया: कल्पनाया: कारणेन अस्ति ।
२४. साहित्यशस्त्रे रससम्प्रदाय: केन प्रवर्तित: ?
उ- साहित्यशास्त्रे मुनिना भरतेन रससम्प्रदाय: प्रवर्तित: ।
२५. अलङ्कारसम्प्रदाय: कै: परिवर्धित: ?
उ- अलङ्कारसम्प्रदायस्य परिवर्धनं भामह-उद्भट-रुद्रटादिभि: परिवर्द्धित:।
२६. वक्रोक्तिशब्दस्य वाच्यार्थ: कोऽस्ति ?
उ- वक्रा उक्ति: अर्थात् सर्वसाधारणजनानां कथनाद् भिन्नमलौकिक-चमत्कारै: संयुक्तं समीचीनकथनं वक्रोक्तिशब्दस्य वाच्यार्थोऽस्ति ।
२७. आचार्यकुन्तकमतेन वक्रोक्तेरर्थो लेख्य: ?
उ- आचार्यकुन्तकानुसारं वक्रोक्तिरित्यस्यार्थ: 'वैदग्ध्यभङ्गीभणिति:' वर्तते।
२८. वक्रोक्तिजीविते ग्रन्थे मूले कारिकायां वृत्तौ च वक्रोक्तिशब्दस्य कोऽर्थ: निर्णीतोऽस्ति ?
उ- वक्रोक्तिजीविते मूले वृत्तौ च वक्रोक्तिशब्दस्यार्थो निर्णीत: यथा- 'वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते' इति । तथा च वृत्तौ- 'वक्रोक्ति:



Scanned with CamScanner

प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाभिधा । वैदग्ध्यं कविकौशलं तस्य भङ्गी विच्छित्ति:' इति ।

**२९. आचार्यभामह: वक्रोक्तिविषये किमाह ?**

उ- आचार्यो भामह: अतिशयोक्त्यलङ्कारमेव वक्रोक्तिनाम्ना सम्बोधयति, अलङ्कारस्य जीवनाधायकत्वञ्च स्वीकरोति यथा–

'सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते ।'

**३०. लोचनकारेण वक्रोक्तिविषये किं भणितम् ?**

उ- 'शब्दस्य वक्रता अभिधेयस्य च वक्रता लोकोत्तीर्णेन रूपेणावस्थान'मिति ।

**३१. काव्यादर्शकारो दण्डी वक्रोक्तिविषये किमुद्घोषयति ?**

उ- वक्रोक्ति-स्वभावोक्तिस्वरूपाभ्यां वाङ्मयं द्विविधं प्रोक्तम्, वक्रोक्तौ श्लेषेण सौन्दर्योत्पत्ति: स्वीकृता: तथाहि–

श्लेष: सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम् ।
भिन्नं द्विधा समासोक्ति: वक्रोक्तिश्चेति वाङ्मयम् ।।

**३२. आचार्यकुन्तकस्य विश्लेषणाशक्ति: कीदृशी विद्यते ?**

उ- आचार्यकुन्तकस्य विश्लेषणा-विवेचनाशक्तिश्च श्लाघनीयाऽस्ति ।

**३३. वक्रोक्तिजीवितं नामक: आचार्यकुन्तकस्य ग्रन्थ: कीदृशोऽस्ति ?**

उ- राजानक आचार्यकुन्तकमहाभागानामयं वक्रोक्तिजीवितम् नामको ग्रन्थ: अलङ्कारशास्त्रस्य मौलिकविचाराणाम् आयतनभाण्डागार: वर्त्तते।

**३४. रुद्रटाचार्यानुयायिन: आचार्या: वक्रोक्तिविषये किं मन्यन्ते ?**

उ- केचन रुद्रटानुयायिन: आचार्या: वक्रोक्तिं सामान्यशब्दालङ्कारमात्रमेव स्वीकुर्वन्ति ।

**३५. वक्रोक्ते: बीजरूपेणोपस्थापनस्य श्रेय: कमस्ति ?**

उ- वक्रोक्ते: महनीयां भावनां बीजरूपेणोपस्थापनस्य श्रेय: आचार्य भामहमस्ति ।

**३६. आचार्यभामहद्वारा समुपस्थापितबीजस्य अङ्कुरणपल्लवनस्य च श्रेय: कस्यास्ति ?**



उ- भामहाचार्यारोपितबीजस्योदात्तरूपेणाङ्कुरणस्य पल्लवनस्य च श्रेय: कुन्तकस्यैवास्ति ।

**३७. आचार्यकुन्तकस्य कल्पनायां ध्वन्यालोकादिग्रन्थानां किं स्थानं निर्धारितमस्ति ।**

उ- आचार्यकुन्तकमहाभागेन स्वकीये वक्रोक्तिजीवितनामके ग्रन्थे ध्वन्यालोकस्थितानामपि पद्यानाम् उदाहरणरूपेण संग्रह: कृत:, यत्र वक्रोक्ते: कल्पना इयती उदात्ता, व्यापिका, बहुमुखी चास्ति यत्तदाभ्यन्तरे ध्वने: सर्वमपि प्रपञ्चं प्रपञ्चितमस्ति । अत एव 'वक्रोक्ति: काव्यजीवित'-मिति सार्थकत्वमावहति ।

**३८. कुन्तकाचार्यानुसारं समेषामलङ्काराणां समावेश: कुत्र भवति ?**

उ- उपमादयोऽलङ्कारा: सर्वेऽपि राजानक आचार्यकुन्तकमतेन वाक्य-वक्रतायां समाविष्टा: भवन्ति, तथाहि–

वाक्यस्य वक्रभावोऽन्यो भिद्यते य: सहस्रधा ।
यत्रालङ्कारवर्गोऽसौ सर्वोप्यन्तर्भविष्यति ।। इति ।

**३९. अत्र ग्रन्थे किन्नामाभिधेयम् ?**

उ- उपमादिप्रमेयजातमभिधेयम् ।

**४०. अत्र ग्रन्थे आचार्यकुन्तकाभिमतमभिधानञ्च किम् ?**

उ- अस्य ग्रन्थस्य 'अलङ्कार' इत्यभिधानम् ।

**४१. वक्रोक्तिजीवितमिति ग्रन्थस्य प्रयोजनञ्च किमस्ति ?**

उ- यद्यपि सन्ति शतश: काव्यालङ्कारास्तथापि न कुतश्चिदपि एवंविध-वैचित्र्यसिद्धि:, अत: वैचित्र्यसिद्धिरेवास्य ग्रन्थस्य प्रयोजनमिति ।

**४२. आचार्यकुन्तक: प्रयोजनकथनावसरे किं विचारयति ?**

उ- आचार्यराजानककुन्तक: अलङ्कारस्य अलङ्कार्यस्य च भिन्नं प्रयोजनं प्रस्तौति नैजे वक्रोक्तीवितं नामके ग्रन्थे । तत्रालङ्कारप्रयोजनं एकचत्वारिंशत्तमे प्रश्नोत्तरे निर्दिष्टमस्ति ।

**४३. कुन्तकाचार्याभिमतानि काव्यस्य वा प्रयोजनानि निर्दिश्यताम्?**



Scanned with CamScanner

उ- धर्मादिसाधनोपायः सुकुमारक्रमोदितः ।
काव्यबन्धोऽभिजातानां हृदयाह्लादकारकः ।।

**४४. कुन्तकाभिमतं काव्यस्य द्वितीयं प्रयोजनं प्रदर्शयत ?**

उ- व्यवहारपरिस्पन्दसौन्दर्यं व्यवहारिभिः ।
सत्काव्याधिगमादेव नूतनौचित्यमाप्यते ।।

**४५. वक्रोक्तिजीविते निर्दिष्टं तृतीयं काव्यप्रयोजनं प्रतिपादयत ?**

उ- चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम् ।
काव्यामृतरसेनान्तश्चमत्कारो वितन्यते ।।

**४६. कुन्तकाचार्यकृतं काव्यलक्षणं प्रदर्शयत ?**

उ- अलङ्कृतिरलङ्कार्यमपोद्धृत्य विवेच्यते ।
तदुपायतया तत्त्वं सालङ्कारस्य काव्यता ।।

**४७. वक्रोक्तिजीविते प्रतिपादितमपरं काव्यलक्षणं लिखत ?**

उ- शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि ।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि ।।

**४८. कुन्तकाचार्याभिमतं साहित्यलक्षणं प्रतिपाद्यताम् ?**

उ- साहित्यमनयोः शोभाशालितां प्रति काऽप्यसौ ।
अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः ।।

**४९. सत्सु वेदादिशास्त्रेषु किमिति काव्यस्यावश्यकत्वमिति साध्यताम् ?**

उ- कटुकौषधवच्छास्त्रमविद्याव्याधिनाशनम् ।
आह्लाद्यमृतवत् काव्यमविवेकगदापहम् ।।

**५०. शब्दार्थयोः स्वरूपं प्रतिपादयत ?**

उ- वाच्योऽर्थो वाचकः शब्दः प्रसिद्धमिति यद्यपि ।
शब्दाभिधेयालङ्कारभेदादिष्टं द्वयन्तु नः ।।

**५१. वक्रोक्तेरेवालङ्कारत्वं साध्यताम् ।**

उ- उभावेतावलङ्कार्यौ तयोः पुनरलङ्कृतिः ।
वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते ।।

**५२. स्वभावोक्तेरलङ्कारत्वं खण्डयत ?**



उ- शरीरं चेदलङ्कारः किमलङ्कुरुतेऽपरम् ।
आत्मैव नात्मनस्कन्धं क्वचिदप्यधिरोहति ।।

**५३. काव्यलक्षणे निर्दिष्टस्य 'सहितौ' शब्दस्यार्थं स्पष्टीकुरुत ?**

उ- शब्दार्थौ सहितावेव प्रतीतौ स्फुरतः सदा ।
सहिताविति तावेव किमपूर्वं विधीयते ।।

**५४. वर्णविन्यासवक्रत्वं प्रतिपादयत ?**

उ- वर्णानां विन्यासो वर्णविन्यासः अर्थात् अक्षराणां विशिष्टन्यसनं, तस्य वक्रत्वं वक्रभावः प्रसिद्धप्रस्थानव्यतिरेकिणा वैचित्र्येणोपनिबद्धः ।

**५५. वर्णविन्यासवक्रतायाः उदाहरणं प्रतिपादयत ?**

उ- वर्णविन्यासवक्रताया उदाहरणं प्रस्तूयते, यथा-
प्रथममरुणच्छायस्तावत्ततः कनकप्रभ-
स्तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः ।
प्रसरति ततो ध्वान्तक्षोदक्षमक्षणदा मुखे
सरसविसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः ।।

**५६. वर्णविन्यासवक्रतायां कोऽलङ्कारो विलीयत इति स्पष्टयत ।**

उ- वर्णविन्यासवक्रतायामनुप्रास अलङ्कारो विलीयते ।

**५७. कविव्यापारवक्रतायाः द्वितीया वक्रता प्रतिपादनीया ?**

उ- कविव्यापारवक्रतायाः द्वितीया वक्रता पदपूर्वार्द्धवक्रताऽस्ति ।

**५८. पदपूर्वार्द्धवक्रतायाः भेदाः प्रदर्शनीयाः ?**

उ- सुबन्तस्य तिङन्तस्य वा पदस्य यः पूर्वार्द्धः अर्थात् प्रातिपदिकलक्षणं धातुलक्षणं वा विद्यते, तस्य वक्रता रचनावैचित्र्यं भवति, तत्राप्यनेके भेदाः भवन्ति- प्रत्ययाश्रितवक्रता, वाक्यवक्रता, प्रकरणवक्रता, प्रबन्धवक्रता इत्यादयो भेदाः भवन्ति ।

**५९. क्रियावैचित्र्यवक्रताया उदाहरणं देयम् ?**

उ- स्वेच्छा केशरिणः स्वच्छस्वच्छायायासितेन्दवः ।
त्रायन्तां वो मधुरिपोः प्रपन्नार्तिच्छिदो नखाः ।।

इति क्रियावैचित्र्यवक्रतायाः उदाहरणम् ।



Scanned with CamScanner